वेदविभाग

शास्त्री द्वितीय वर्ष:

चतुर्थ अध्याय: (महीधर भाष्य)

दिनांक 16-7-20

Date

① मन्त्र —

"विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम्।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा॥"

व्याख्या →

इदं मन्त्र: विश्वो देवता, सावित्र्यनुष्टुप् छन्द:, स्वस्त्यात्रेयदृष्टा॥

विश्वो मर्त: सर्वो मनुष्यो नेतु: फलप्रापकस्य देवस्य दानादिगुणयुक्तस्य सवितु: सख्यं सखिभावं वुरीत वृणुते प्रार्थयते। 'वृञ् वरणे' अस्माल्लिङि तङि प्रथमैकवचने व्यत्ययेन शपो लुकि 'उदोष्ठ्यपूर्वस्य' (पा० ७।१।१०२) इति ऋत उत्वादेश:। किञ्च विश्व: सर्वो जनो राये धनाय इषुध्यति सवितारं प्रार्थयते। 'इषुध्यतिर्याञ्चा-कर्मसु पठित:' (निघ० ३।७।१५)। किञ्च द्युम्नं द्योततेर्यशो वान्नं वा तच्च वृणीत प्रार्थयते। किमर्थम्। पुष्यसे पोषाय स्वप्रजापालनाय। पुषेस्तुमर्थे असेप्रत्यय:। य: इत्थंभूत: सविता तस्मै स्वाहा। इति षष्ठ औद्ग्रभणमन्त्र:॥

॥ इति ॥

वेद विभाग
16/7/20